CBSE Class 9 Sanskrit

# प्रतिदर्श

# प्रश्न–पत्रम् -7

## स्वतः मूल्यांकन

समय : होरात्रयम् ] [ पूर्णाङ्का: 90

**निर्देशा:**

(i) प्रश्नपत्रे चत्वार: खण्डा: सन्ति।

| | | | |
|---|---|---|---|
| खण्ड: (क) | अपठित-अवबोधनम् | – | 10 अङ्का: |
| खण्ड: (ख) | रचनात्मकं कार्यम् | – | 15 अङ्का: |
| खण्ड: (ग) | अनुप्रयुक्त-व्याकरणम् | – | 30 अङ्का: |
| खण्ड: (घ) | पठित-अवबोधनम् | – | 35 अङ्का: |

(ii) सर्व प्रश्ना: अनिवार्या:।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्न संख्या अवश्यं लेखनीया।

(v) उत्तराणि संस्कृतेन एव लेखनीयानि।

## खण्ड : 'क'

**अपठित-अवबोधनम्** **(10 अङ्का:)**

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत—**

अनुशासनम् हि नाम कर्त्तव्यपालनम्। सर्वेषां कृते अनुशासनम् आवश्यकम्। प्रकृतिरपि अनुशासनं पालयति, यथा अनुशासनकारणादेव सूर्य: स्वपरिपथे भ्रमति, वायु: अहर्निशं वहति, समये मेघ: वर्षति, समयानुसारेण ऋतव: आयान्ति यान्ति च। तथैव मानवजीवने कर्त्तव्य-अकर्त्तव्यबोध: अनुशासनात् एव भवति। परञ्च अद्यत्वे विशेषत: छात्रमध्ये अनुशासनाभाव: दृश्यते, ते विद्यालयस्यानुशासनं सम्यक्रूपेण न परिपालयन्ति, सर्वदा नियमान् उल्लंघ्य राष्ट्रीयसम्पद: हानिं कुर्वन्ति। गुरून् मातापितृन् तिरस्कुर्वन्ति। अत: विद्यालये छात्रेभ्य: अनुशासनशिक्षा दातव्या येन ते स्वजीवनं सफलं कृत्वा देशस्यापि शिर: उन्नतं करिष्यन्ति। एवमेव अनुशासनाभावात् छात्रा: स्वजीवनेन सह राष्ट्रस्यापि विनाशं करिष्यन्ति।

**प्रश्ना:**

**I. एकपदेन उत्तरत—** **1 + 1 = 2**

(i) किं नाम अनुशासनम्?

(ii) अनुशासनहीना: छात्रा: राष्ट्रस्य किं करिष्यन्ति?

**II. पूर्णवाक्येन उत्तरत—** **1 + 1 = 2**

(i) प्राकृतिकशक्तय: अनुशासनं पालयन्त्य: किं किं कुर्वन्ति?

(ii) मानव: जीवने कस्य बोध: अनुशासनात् भवति।

**III. निर्देशानुसारम् उत्तरत—** **1 + 1 + 1 + 1 = 4**

(i) 'आयान्ति' इति क्रियापदस्य किं कर्तृपदम्?

(अ) सूर्य: (ब) ऋतव: (स) शक्तय: (द) छात्रा:

(ii) 'ते विद्यालयस्यानुशासनम्' अत्र 'ते' पदं केभ्य: प्रयुक्तम्?

(अ) जनेभ्य: (ब) गुरुभ्य: (स) छात्रेभ्य: (द) राष्ट्रेभ्य:

LearnCBSE.in

(iii) 'कर्त्तव्यबोध:' अस्य किम् विलोमपदम् गद्यांशे प्रयुक्तम्?

(अ) अनुशासनबोध: (ब) अकर्त्तव्यबोध: (स) अनुशासनबोधा: (द) ऋतुबोध:

(iv) ते स्वजीवनं सफलं कृत्वा देशस्यापि शिर: उन्नतं कुर्वन्ति अस्मिन् वाक्ये 'शिर:' इति पदस्य विशेषणपदं किम्?

(अ) ते (ब) देशस्य (स) स्वजीवनम् (द) उन्नतम्

IV. **अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** **2**

## खण्ड: (ख)

### रचनात्मकं कार्यम् (15 अङ्का:)

2. **भवान् शैलेश:। भवत: मित्रम् समीरं प्रति पर्वतीययात्रार्थम् लिखिते निमन्त्रणपत्रे मञ्जूषात: रिक्तस्थानानि पूरयित्वा पत्रं पुन: उत्तरपुस्तिकायाम् लिखत।** ½+½+½+½+½+½+½+½+½+½ = 5

कुरुक्षेत्रत:

दिनांक ...............

प्रिय मित्र (i)....... !

सप्रेम नमोनम:

पत्रेण ज्ञातम् यत् भवत: नवमकक्षाया: परीक्षा (ii)....... जाता, परिणाम: च अग्रिमे (iii)....... आगमिष्यति। अहम् अपि अधुना (iv)....... अनन्तरं परिणामस्य प्रतीक्षां करोमि। अस्मिन् अवकाश-अवसरे अहम् (v)....... कर्तुम् इच्छामि। भवान् अपि शीघ्रम् अत्र (vi)....... आवाम् रुद्र-प्रयागं गमिष्याव:। तत्र मम मातुलस्य (vii)....... अस्ति। किञ्चित् कालं मिलित्वा (viii)....... करिष्याव:, बाल्यकालस्य दिवसान् च (ix).......। आशास्ति भवान् निश्चितरूपेण आगमिष्यति। स्वपित्रो: सेवायाम् मम प्रणामान् निवेदयतु।

भवत: मित्रम् (x).......।

**मञ्जूषा**

| |
|---|
| मासे, आगच्छेत्, समाप्ता, शैलेश:, व्यतीतम्, स्मरिष्याव:, गृहम्, समीर!, परीक्षाया:, पर्वतयात्राम् |

3. **मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतेन लिखत।** **2 + 2 + 2 + 2 + 2 = 10**



**मञ्जूषा**

| |
|---|
| वृक्षा:, खगा:, पुष्पाणि, शुक:, उत्पतन्ति, वृद्ध:, गगने, पादपा:, जलेन, सिञ्चति, आम्राणि, वृक्षस्योपरि, पत्राणि, पादपा:, एव |

**अथवा**

**मञ्जूषायां प्रदत्तशब्दानां सहायतया ''ग्रामीण-जीवनम्'' इति विषयम् अधिकृत्य पञ्चवाक्यानि संस्कृते लिखत।**

**2 + 2 + 2 + 2 + 2 = 10**

**मञ्जूषा**

| |
|---|
| शिक्षिता:, जना: सर्वसुविधासम्पन्ना:, क्षेत्राणि, सिञ्चन्ति, अपि, विद्यालय: वैज्ञानिकविधिना, अस्ति, कुर्वन्ति, कृत्रिम्, पठन्ति, हरीतिमा, सर्वत्र, प्रदूषणरहितम् |

LearnCBSE.in

## खण्ड: (ग)

### अनुप्रयुक्त-व्याकरणम् (30 अङ्का:)

**4. (अ) अधोलिखितप्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत।** **1 + 1 = 2**

(i) ऋ वर्णस्य किम् उच्चारणस्थानम् अस्ति?

(ii) 'स्यात्' इति पदे दन्त्य: वर्ण: अस्ति?

**(आ) रिक्तस्थानं पूरयत—** **1 + 1 = 2**

(iii) प्रयच्छति = प् + र् + अ + य् + अ + ....... + छ् + अ + त् + इ

(iv) व् + इ + द् + व् + आ + न् = ..................

**5. प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा सन्धिं सन्धिच्छेदं वा कुरुत—** **1 + 1 + 1 + 1 + 1 = 5**

(i) <u>कवीश्वर:</u> कालिदास: आसीत्।

(अ) कवी + ईश्वर: (ब) कवीश + वर: (स) कवि + ईश्वर: (द) कव + ईश्वर:

(ii) <u>नदी + अत्र</u> वहति।

(अ) नदीत्र (ब) नदयत्र (स) नदित्र (द) नद्यत्र

(iii) <u>राष्ट्र + एकत्वम्</u> सदैव चिन्तनीयम्।

(अ) राष्ट्रेक्त्वम् (ब) राष्ट्रैकत्वम् (स) राष्टेकत्वम् (द) राष्ट्रैक्त्वम्

(iv) अद्य <u>वनोत्सव:</u> अस्ति।

(अ) वन + उत्सव: (ब) वनो + ओत्सव: (स) वन + ओत्सव: (द) वन + ऊत्सव:

(v) कन्यादानं <u>महद्दानम्</u> अस्ति।

(अ) महा + दानम् (ब) महद् + दानम् (स) महान् + दानम् (द) महत् + दानम्

**6. प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा रिक्तस्थानानि पूरयत—** **1 + 1 + 1 + 1 + 1 = 5**

(i) .................... आश्रमे वसन्ति।

(अ) मुनि: (ब) मुनीन् (स) मुनिभि: (द) मुनय:

(ii) मम .................... कार्यालय: दिल्लीनगरे अस्ति।

(अ) पितु: (ब) पित्रा (स) पितरम् (द) पित्रे

(iii) .................. कक्षे पञ्च जना: सन्ति।

(अ) अस्याम् (ब) अस्या: (स) अस्य (द) अस्मिन्

(iv) .................... पक्षा: शोभना: भवन्ति।

(अ) खगेभ्य: (ब) खगान् (स) खगेन (द) खगानाम्

(v) वेदा: चत्वार: ....................।

(अ) असि (ब) अस्ति (स) स्त: (द) सन्ति

**7. प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा रिक्तस्थानानि पूरयत—** **1 + 1 + 1 + 1 + 1 = 5**

(i) भक्ता: देवालये देवान् ..........................।

(अ) नमति (ब) नमसि (स) नमामि (द) नमन्ति

(ii) छात्रा: प्रात: काले विद्यालयं ....................।

(अ) गच्छथ: (ब) गच्छत: (स) गच्छति (द) गच्छन्ति

(iii) व्यास: महाभारतस्य रचनाम् ......................।

(अ) अकरोत् (ब) अकुरुताम् (स) अकुर्वन् (द) अकवरम्

(iv) सुभाष: देशभक्त: ....................।

(अ) आसीत् (ब) आसी: (स) आस्ताम् (द) आसम्

(v) मह्यम् मोदकम् ......................।

(अ) रोचेते (ब) रोचन्ते (स) रोचते (द) रोचे

LearnCBSE.in

8. कोष्ठके प्रदत्तानां शब्दानाम् उचितेन रूपेण वाक्यानि लिखत— 1 + 1 + 1 + 1 + 1 = 5

(i) अस्माकं ................ परितः वृक्षाः सन्ति। (ग्रामम्)

(ii) तत्र वृक्षेषु खगाः ................ सह कूजनं कुर्वन्ति। (खगः)

(iii) ..................... अधः वयं पादकन्दुकेन क्रीडामः। (वृक्षम्)

(iv) वयं सर्वे .................... कुशलाः स्मः। (क्रीडति)

(v) .................. उभयतः कदम्बवृक्षाः शोभन्ते। (नदी)

9. रेखाङ्कितपदेषु प्रकृति-प्रत्ययौ संयोज्य, विभज्य वा उत्तरं लिखत— 1 + 1 + 1 + 1 + 1 + 1 = 6

(i) भ्राता आसने उप + विश् + ल्यप् दूरदर्शनं पश्यति।

(ii) अहं स्नात्वा खादामि।

(iii) ते स्नानं कर्तुं नदीं गच्छन्ति।

(iv) अहं धनं दत्त्वा पुस्तकानि क्रीणामि।

(v) सेवकः सभां प्र + विश् + ल्यप् राजानं नमति।

(vi) सः फलं कृत् + तुमुन् छुरिकाम् आनयति।

## खण्डः (घ)

### पठित-अवबोधनम् (35 अङ्काः)

10. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानां उत्तराणि संस्कृतेन लिखत। 5

आसीत् पुरा कोऽपि महातपा नाम वनवासी मुनिः। एकदा यदा स तरुच्छायोपविष्ट आसीत् तदा तस्योपरि एका बलाका विष्ठाम् उदसृजत्। स च क्रुद्धस्तां व्यलोकयत्। दृष्टमात्रा एव बलाका भस्मसाद् अभूत्। ततश्च स मुनिः तपः प्रभावाद् अहङ्कारम् उपगतः।

प्रश्नाः

I. एकपदेन उत्तरत। ½ + ½ = 1

(i) वनवासीमुनेः किं नाम ?

(ii) मुनिः कुत्र उपविष्टः आसीत् ?

II. पूर्णवाक्येन उत्तरत। 2

मुनिः कस्मात् कारणात् अहंकारम् उपगतः ?

III. उचितम् उत्तरं चित्वा लिखत। 1 + 1 = 2

(i) 'आसीत्' इति क्रियापदस्य कर्तृपदं किम् ?

(अ) तपः (ब) बलाका (स) मुनिः (द) पुरा।

(ii) 'तस्योपरि' इत्यस्य सन्धि विच्छेदम् अस्ति ?

(अ) तस्य + उपरि (ब) तस्या + उपरि (स) तस्यः + परि (द) तस्य + ऊपरि

11. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। 5

**शोको नाशयते धैर्यं शोको नाशयते श्रुतम्।**
**शोको नाशयते सर्वं नास्ति शोकसमो रिपुः॥**

प्रश्नाः

I. एकपदेन उत्तरत— ½ + ½ = 1

(i) शोकः किं नाशयति ?

(ii) शोकसमो कः न अस्ति ?

II. पूर्णवाक्येन उत्तरत— 2

शोकः किं किं नाशयति ?

III. निर्देशानुसारम् उत्तरत— 1 + 1 = 2

(i) 'शत्रुः' इति अर्थे अत्र किं पदं प्रयुक्तम् ?

(अ) रिपुः (ब) श्रुतम् (स) सर्वं (द) शोकः

LearnCBSE.in

(ii) 'नास्ति' इति पदस्य सन्धिविच्छेदं अत्र किम् ?

(अ) ना + अस्ति (ब) न + अस्ति (स) नास् + ति (द) नो + अस्ति।

**12. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** **5**

विवेक: पथि हितकरं पाथेयम् भवति। अत: स्यूते कानिचित् फलानि अथ च ज्ञानवर्धनाय द्वित्राणि पुस्तकानि अपि सन्ति।

विशाल: इदानीं ज्ञातम्। अतएव अस्माकं मणिका पाठ्यपुस्तके पाथेयम् इति पाठे सुभाषितानि सन्ति।

विवेक: ननु सुभाषितानि एव अस्माकं जीवने मार्गदर्शनं कुर्वन्ति।

विशाल: शुभाय भवतु ते पाथेयम्।

**प्रश्ना:**

**I. एकपदेन उत्तरत—** **½ + ½ = 1**

(i) कुत्र हितकरं पाथेयं भवति ?

(ii) सुभाषितानि कस्य जीवने मार्गदर्शनं कुर्वन्ति ?

**II. पूर्णवाक्येन उत्तरत—** **2**

शुभाय भवतु इति क: कथयति ?

**III. निर्देशानुसारम् उत्तरत—** **1 + 1 = 2**

(i) 'सुभाषितानि एव अस्माकं जीवने मार्गदर्शनं कुर्वन्ति' इत्यस्मिन् वाक्ये 'कुर्वन्ति' इति क्रिया पदस्य किं कर्तृपदम् ?

(अ) जीवने (ब) अस्माकं (स) मार्गदर्शनं (द) सुभाषितानि।

(ii) 'पाठ्यपुस्तके' इत्यत्र का विभक्ति: प्रयुक्ता ?

(अ) प्रथमा (ब) सप्तमी (स) द्वितीया (द) तृतीया।

**13. अधोलिखितपंक्त्यो: उचितं भावार्थं चित्वा उत्तरपुस्तिकायां लिखत।** **1 + 1 + 1 + 1 = 4**

**(i) सर्वस्य लोचनं शास्त्रम्।**

(1) शास्त्राणां ज्ञानं चक्षु: इव भवति।

(2) शास्त्राणां ज्ञानं श्रोत्रम् इव भवति।

(3) नेत्रम् इव न भवति ज्ञानम्।

**(ii) अत्र रामश्च सीता च लक्ष्मणश्च महायशा:।**

(1) अस्मिन् आश्रमे राम: च सीता च लक्ष्मण: च विराजन्ते।

(2) अस्मिन् आश्रमे राम: लक्ष्मण: सीता च न वसन्ति।

(3) अत्र सत्यं शीलम् च साक्षात् स्थिता:।

**(iii) शोको नाशयते धैर्यम्।**

(1) धैर्य: नाशयते सर्वं शोकम्।

(2) शोक: मनुष्यस्य धैर्यं नाशयते।

(3) धैर्येण मनुष्य: नाशयते।

**(iv) कोऽर्थवान् को दरिद्र:।**

(1) मनसि तृष्णा न भवति।

(2) मनसि संतुष्टे कोऽपि धनिक: अथवा दरिद्र: न भवति।

(3) मनसि संतुष्टे कोऽपि धनिक: न भवति।

**14. अधोलिखितपद्यांश द्वयस्य अन्वययो: मञ्जूषाया: सहायतया रिक्तस्थानपूर्तिं कुरुत—** **1 + 1 + 1 + 1 = 4**

**(I) पादोपभुक्ते तव पादुके मे एते प्रयच्छ प्रणताय मूर्ध्ना।**
**यावद् भवानेष्यति कार्यसिद्धिं तावद्भविष्याम्यनयोर्विधेय:।।**

**अन्वय:**—एते तव पादोपभुक्ते ___(i)___ मूर्ध्ना प्रणताय मे ___(ii)___ यावद् भवान् ___(iii)___ एष्यति तावद् अनयो: ___(iv)___ भविष्यामि।

LearnCBSE.in

**(II) गौरवं प्राप्यते दानात् न तु वित्तस्य सञ्चयात्।**

**स्थितिरुच्चैः पयोदानां पयोधीनामधः स्थितिः ॥**

**अन्वयः**—दानात् ___(v)___ प्राप्यते वित्तस्य ___(vi)___ तु न। पयोदानाम् ___(vii)___ उच्चैः ___(viii)___ (च) स्थितिः अधः (भवति)।

**मञ्जूषा**

| |
|---|
| स्थितिः, पादुके, विधेयः, पयोधीनाम्, कार्यसिद्धिं, गौरवं, प्रयच्छ, सञ्चयात् |

**15. वाक्येषु रेखांकितस्थाने प्रश्नवाचकपदं प्रयुज्य प्रश्ननिर्माणं कुरुत—** **1 + 1 + 1 + 1 = 4**

(i) ब्राह्मणः दरिद्रयात् अचिन्तयत्।

(ii) पित्रा दुष्करं कृतम्।

(iii) धन्यमाना भूमिः तोयं ददाति।

(iv) चञ्चलं मनः न भ्रामयेत्।

**16. घटनाक्रमानुसारं वाक्यानि पुनः लिखत—** **½+½+½+½+½+½+½+½ = 4**

(i) कृतप्रणामः भरतः रामस्य पादुकयोः विधेयः भवितुम् इच्छति।

(ii) सीतायाः अभिवादनं कृत्वा भरतः अनुगृहीतः भवति।

(iii) सुमन्त्रः लक्ष्मणं भरतस्य परिचयं कारयति।

(iv) रामः भरतं राज्यरक्षणस्य दायित्वं निर्वोढुं कथयति।

(v) रामं दृष्ट्वा भरतः तं प्रणम्य तस्य पादमूले स्थातुम् इच्छति।

(vi) लक्ष्मणः भरतस्य आगमनं रामाय निवेदयति।

(vii) रामः सीतां भरतस्य स्वागतार्थम् आज्ञापयति।

(viii) भरतः सुमन्त्रं निजागमनं रामाय निवेदयितुं कथयति।

**17. (अ) अधोलिखितवाक्येषु रेखांकितपदानां कृते उचितम् अर्थं चित्वा लिखत—** **1 + 1 = 2**

(i) एतद् अद्भुतं प्रश्नं श्रुत्वा श्वेतकेतुः पृच्छति।

(अ) दृष्ट्वा (ब) पृष्ट्वा (स) आकर्ण्य (द) आगम्य

(ii) रक्तविलिप्तमुखपादः नकुलः तस्य चरणयोः अलुठत्।

(अ) पादयोः (ब) हस्तयोः (स) बालकयोः (द) पुत्रयोः

**(आ) शब्दानाम् अर्थैः सह मेलनं कुरुत।** **½ + ½ + ½ + ½ = 2**

| | |
|---|---|
| (i) व्यापाद्य | (अ) शीघ्रम् |
| (ii) सत्वरम् | (ब) आनय |
| (iii) अणिम्नः | (स) मारयित्वा |
| (iv) आहर | (द) सूक्ष्मात् |

LearnCBSE.in